THE FIVE PRINCIPAL

MUSICIANS OF THE HINDUS,

OR

A BRIEF EXPOSITION OF THE ESSENTIAL ELEMENTS OF HINDU MUSIC,
AS SET FORTH BY THE FIVE CELESTIAL MUSICIANS OF INDIA,

AN OFFERING TO THE

Fifth International Congress of Orientalists,

TO BE HELD AT BERLIN IN SEPTEMBER, 1881.

BY

RAJAH SOURINDRO MOHUN TAGORE, Mus. Doc., F.R.S.L., M.R.A.S.,
Companion of the Order of the Indian Empire;
KNIGHT OF THE FIRST CLASS OF THE IMPERIAL ORDER OF "PAOU SING," OR PRECIOUS STAR, CHINA;
OF THE ORDER OF BASABAMALA, SIAM; OF THE GURKHA STAR OF SARASVATI, NEPAUL;
OF THE 2ND CLASS OF THE IMPERIAL ORDER OF THE LION AND SUN, PERSIA; CHEVALIER OF THE 2ND CLASS
OF THE IMPERIAL ORDER OF MEDJIDIE, TURKEY;
KNIGHT COMMANDER OF THE MOST EXALTED ORDER OF FRANCIS JOSEPH, AUSTRIA;
OF THE 1ST CLASS OF THE ORDER OF ALBERT, SAXONY; OF THE ORDER OF LEOPOLD, BELGIUM;
FRANC CHEVALIER OF THE ORDER OF THE KNIGHTS OF THE HOLY SAVIOUR OF MONT REAL, JERUSALEM,
RHODES AND MALTA; CHEVALIER OF HONOR OF HER HIGHNESS MARY OF LUSIGNAN, PRINCESS ROYAL OF CYPRUS,
OF JERUSALEM, AND OF ARMENIA;
KNIGHT OF HONOR OF SAVIOURS OF THE MARITIME ALPS; HIGH PROTECTOR OF THE
ORDER OF THE HUMANITARIAN ACADEMY OF THE WHITE CROSS OF LEGHORN, ITALY; KNIGHT OF HONOR
OF THE ORDER OF CABALLEROS HOSPITALAROS, SPAIN;
CHEVALIER OF THE ROYAL MILITARY ORDER OF CHRIST, PORTUGAL; CAVALIER OF HONOR OF THE ACADEMIC ORDER
OF BUENOS AYRES, SOUTH AMERICA; HONORARY MEMBER OF THE PHILHARMONIC SOCIETY, MELBOURNE,
AUSTRALIA; CORRESPONDING MEMBER OF THE SOCIETY OF ARTS AND SCIENCES, JAVA;
HONORARY MEMBER OF THE ROYAL ASIATIC SOCIETY, STRAITS BRANCH, MALAYA;
SANGITA-SILPA-VIDYASAGARA
AND BHARATIYA-SANGITA-NAYAKA, NEPAUL;
FELLOW OF THE UNIVERSITY OF CALCUTTA, AND PRESIDENT, BENGAL MUSIC SCHOOL, CALCUTTA;
HONORARY MEMBER OF THE ROYAL ASIATIC SOCIETY, CEYLON;
PRESIDENTE ONORARIO HOSPITALIERS D'AFRIQUE, ALGERIA, AFRICA;
PATRON OF THE ATHENÆUM OF THE ROYAL UNIVERSITY OF SASSARI, SARDINIA;
PRESIDENTE D'ONORE SOCIETA ACCADEMICA SCIENTIFICO-LETTERARIO GLI OTTIMATI, CATANEA, SICILY;
ORDINARY MEMBER OF THE ORIENTAL ACADEMY, FLORENCE, AND DOTTORE DI MUSICA E DI LETTERE, ITALY;
HIGH PROTECTOR, GRAND OFFICIAL DELEGATE OF THE INSTITUTE, HUMBERT I, LEGHORN, ITALY;
HONORARY MEMBER OF THE ARCHÆOLOGICAL SOCIETY
OF ATHENS, GREECE;
CORRESPONDING MEMBER OF THE ORIENTAL MUSEUM, VIENNA, AUSTRIA;
HONORARY PRESIDENT OF L'UNION VALDOTAINE, GENEVE, SWITZERLAND; OFFICIER DEL'INSTRUCTION PUBLIQUE,
AND HONORARY PRESIDENT OF THE ACADEMY OF CHRISTOPHER COLUMBUS, FRANCE;
ASSOCIATE MEMBER OF THE ROYAL ACADEMY OF SCIENCE, LETTERS, AND FINE ARTS, BRUSSELS, BELGIUM;
FOREIGN MEMBER OF THE ROYAL PHILOLOGICAL AND ETHNOGRAPHICAL INSTITUTION
OF NETHERLANDS INDIA AT THE HAGUE, HOLLAND;
HONORARY MEMBER OF THE ROYAL MUSICAL ACADEMY, STOCKHOLM, SWEDEN;
HONORARY PATRON OF THE SOCIETY OF SCIENCE, LETTERS AND ART, LONDON; HONORARY MAGISTRATE,
MAGISTRATE OF POLICE, AND JUSTICE OF THE PEACE,
FOR THE TOWN OF CALCUTTA;
&c., &c., &c.

1979

BHARATIYA PUBLISHING HOUSE
VARANASI DELHI
INDIA

Hin 198.5.8.2 वेदान्त दर्शन

BHARATIYA PUBLISHING HOUSE
H.O. : B-9/45, Pilkhana, Sonarpur,
VARANASI.
B.O. : First Floor, 42-43 U.B., Jawahar Nagar,
DELHI-110007.

RL 4/85

Published by Sh. D.V. Singh
For Bharatiya Publishing House, Delhi &
Printed at : GOYAL OFFSET PRINTERS
308/6-E, Shahzada Bagh, Daya Basti, Delhi-110035



THE FIVE CELESTIAL MUSICIANS OF THE HINDU MYTHOLOGY PRESENTING THEIR RESPECTIVE WORKS TO THE FIFTH ORIENTAL CONGRESS AT BERLIN.

DESIGNED & LITHOGRAPHED FOR RAJAH SIR S.M. TAGORE MUS. DC.L. &c.

1 Nárada, 2 Bharata, 3 Rambha, 4 Hahu 5 Tumburu.

Lith. and Printed by Ernst Kaemmerer, Berlin

PREFACE.

THE Author of this work has had the honor of being invited to take part in the proceedings of the FIFTH INTERNATIONAL CONGRESS OF ORIENTALISTS, to be held at Berlin in September next. In grateful acknowledgment of the compliment paid to him (to which he is not in a position to respond by personal attendance), he has written the following allegorical paper with a view to its being submitted before the learned Assembly. He regrets that there is not sufficient time to enable him to render his work, and the special subjects which are the life and soul of his work, as exhaustive and comprehensive as he could wish.

भारतीयपञ्चमुखप्रसंगीतकारोपहारः।

अर्थात्

प्राच्यतत्त्वविदाम् दृष्टार्न्यायनालूकन ग्रेस्-सभायै

वर्लीननगरे तस्याः पञ्चमवार्षिकाधिवेशने सबङ्गमानं प्रदत्तो भरतादीनां पञ्चानाम्

भारतीयतौर्य त्रिकशास्त्रकाराणाम्

ग्रन्थसारः।

राजयोगीश्वरीन्द्रमोहन ठाकुरेण

मिडजिक् डाक्तार, एफ्. आर्. एस्. एल्., एम्. आर्. ए. एस्.,

कम्प्रानियन् अव दि अर्डार अव दि इण्डियान् एम्पायार ; नाइट् अव दि फार्ष्ट क्लास अव दि इम्पीरियल् अर्डार अव "ग्राण्डोसिं" अर् "प्रेसस् स्टार्" चायना ; नाइट् अव दि अर्डार अव वसवमाला, श्याम ; नाइट् अव दि गर्खा स्टार अव सरस्वती, नेपाल ; नाइट् अव दि सेकेण्ड क्लास् अव दि इम्पीरियल् अर्डार अव दि लायन एण्ड सन्, पारस्य ; सिभेलियर अव दि सेकेण्ड क्लास अव दि इम्पीरियल् अर्डार अव मेड्जिडि, तुरस्क ; नाइट कमाण्डार अव दि मोष्ट एकजल्टेड् अर्डार अव फान्सिस् जोसेफ्, अष्ट्रिया ; अव दि फार्ष्ट क्लास् अव दि अर्डार अव आल्वर्ड, स्याक्सनि ; नाइट् कमाण्डार अव दि अर्डार अव सिथोपोलड, वेलजियम् ; फाइ सिभेलियर अव दि अर्डार अव दि नाइटस् अव दि होलि सेभियर अव मण्टरियेल, जेरसालम, रोडस् एण्ड माल्टा ; सिभेलियर अव अनार अव हार हाइनेस् मेरि अव लुसिग्नन्, प्रिन्सेस् रयाल अव साइप्रस्, अव जेरुसालेम, एण्ड अव आर्मेनिया ; नाइट् अव अनार अव सेभियर्स अव दि मेरिटाइम् आल्प्स, दि होयाइट् क्रेग् हरन् ; हाइ प्रोटेक्टर अव दि अर्डार अव दि इण्डस्ट्रानिटेरियन् एकाडेमि अव दि होयाइट् क्रस् अव क्रेगहरन्, इटालि ; नाइट अव अनार अव दि अर्डार अव कावालेरस् हस्पिटालेरस्, स्पेन ; सिभेलियर अव दि रयाल मिलिटारि अर्डार अव क्राइष्ट, पटुगाल ; क्याभेलियर अव अनार अव दि एकाडेमिक् अर्डार अव दयानेस् आर्ट्स, साउथ् आमेरिका ; अनारेरि मेम्बर अव दि फिलहार्मोनिक् सोसायटि, मेलबोरन्, अष्ट्रेलिया ; करेस्पण्डिं मेम्बर अव दि सोसायटि अव आर्टस एण्ड सायेन्स, जावा ; अनारेरि मेम्बर अव दि रयाल एसियाटिक् सोसायटि, स्ट्रेट्स ब्रान्च, मालय ; सङ्गीतग्रिल्पविद्यासागर एण्ड भारतीय सङ्गीतनायक, नेपाल ; फेलो अव दि इयुनिभार्सिटि अव कलिकाता, एण्ड वङ्गसङ्गीतविद्यालयप्रतिष्ठातृसभापतिः ; अनारेरि मेम्बर अव दि रयाल एसियाटिक् सोसायटि, सिंहल ; प्रेसिडेण्टि अनोरेरिओ हस्पिटालियर्स डि' आफ्रिक्, आल्जिरिया, आफ्रिका ; पेट्रन अव दि एथेनियम् अव दि रयाल इयुनिभार्सिटि अव सासेरि, सार्डिनिया ; प्रेसिडेण्टि डि' अनोरि सोसिएटा एकाडेमिका सायेण्टिफिको लेटारेरिओ ग्लि ओटिमेटि, काटानिया, सिसिलि ; अर्डिनारि मेम्बर अव दि ओरियेण्टाल् एकाडेमि, फ्लोरेन्स, एण्ड डोटोरि डि मिउजिका एड् लेटारि, इटालि ; हाइ प्रोटेक्टर, ग्राण्ड अफिसियाल् डेलिगेट् अव दि इनिस्टिटियट्, ह्वर्ट १म, लेगहरन्, इटालि ; अनारेरि मेम्बर अव दि आर्चियोलजिकाल सोसायटि अव एथेन्स, ग्रीस ; करेस्पण्डिं मेम्बर अव दि ओरियेण्टाल् मियुजियम्, भायेना, अष्ट्रिया ; अनारेरि प्रेसिडेण्ट अव लुनियन् भालडोटेनि जेनेभ, सुयिजार्लण्ड ; अफिसार डेलिनष्ट्रक्सन् पब्लिक्, एण्ड अनारेरि प्रेसिडेण्ट अव दि एकाडेमि अव क्रिष्टोफर् कलम्बस्, फ्रान्स ; ग्सोसियेट् मेम्बर अव दि रयाल एकाडेमि अव सायेन्स, लेटार्स एण्ड फाइन् आर्टस्, ब्रसेल्स, वेलजियम् ; फारेन् मेम्बर अव दि रयाल फाइलोसजिकाल् एण्ड एथनोग्राफिकाल् इनिस्टिटियुसन्, अव नेदारल्याण्डस् इण्डिया आट् दि हेग्, हलण्ड ; अनारेरि मेम्बर अव दि रयाल् मिउजिकाल् एकाडमि, स्टकहलम्, सुइडेन ; अनारेरि पेट्रन् अव दि सोसायटि अव सायेन्स, लेटार्स एण्ड आर्टस्, लण्डन ; अनारेरि म्याजिष्ट्रेट्, म्याजिष्ट्रेट अव पुलिस्, एण्ड जष्टिस् अव दि पीस्, फर् दि टाउन् अव कलिकाता-प्रभृतिभिरुपाधिभिरन्वितेन

प्रणीतः।

कलिकातानगर्याम्।

शकाब्दाः १८०३।

त्रैलोक्यैश्वर्य्यदृक्षेन विनोदाय विड़ौजसा ।
सङ्गीतं प्रार्थितं वेदादृविधिः प्रादुरभावयत् ॥

भरतं नारदं रम्भां ऊर्ङ्गं तुम्बुरुमेव च ।
पञ्च शिष्यांस्ततोऽध्याप्य सङ्गीतं व्यादिशद्विधिः ॥

ततः सङ्गीतकं कृत्वा ग्रन्थं सर्व्वं पृथक् पृथक् ।
आनन्दयन् देवराजं शिष्यास्ते भरतादयः ॥

नारदसंहिता ।

INTRODUCTORY.

——THEY stood before India's Guardian Divinity—those five celestial musicians—with radiant countenances and with the glory of heaven around them. They had been summoned before that lovely Presence, and they had hastened to obey. As thus they stood expectant, the grave but melodious voice of the goddess ravished their ears :—

"Children beloved, I have to entrust you with a mission of importance and honor. A friendly missive from the West has come speeding all the way over the black waters in which the learned and the great of Europe invite me to be present at one of their mighty gatherings which have tended, year by year, to bind the East and the West in friendlier bonds of union. The noble sons of Germany, whose unceasing efforts, like the fructifying sun, have caused the lotus of Sanskrit literature to unfold its petals one by one in that distant and alien land, have done me this honor, and it is meet that I should respond to the friendly invitation by sending some of my children to represent me worthily at the great Congress to be held in the German capital. You, my children, have I chosen for this mission. Versed in the science and art of music, disciples beloved of Brahma, adored of both gods and men, who so worthy as you to be the representatives of this glorious land in the midst of strangers! Go, therefore, my beloved children, speed over the boundless ocean to that mighty assembly of great men, and carry with you offerings of deathless flowers culled from the fragrant gardens of Indian Music."

With heads bent low the five celestial Beings received the commands of India's Guardian Divinity. Swifter than the levin flash they crossed intervening oceans and arrived where, in that mighty capital, Berlin, the master-minds of the West, those *illuminati* in science and arts, were assembled in solemn conclave, each shining in his sphere as the constellations which adorn heaven's azure brow. Reverently making their obeisance to the august assembly and laying down before them their respective offerings, each, in his turn, addressed those present.

NÁRADA first stepped forth, clad in a hermit's robe, his unkempt white locks shading a noble forehead, the venerable *Rishi*, the esteemed of gods, stood there and surveyed the brilliant gathering. "I am the compiler of that

work (the Nárada Sanhita)," said he. "It treats of the nature and appropriate application of the Sanskrit Rágas (melodies) which take the listener's soul captive, of the arrangement of the notes, of their relation with each other, and of their wonderful variations." (*Gives the substance of his Work, and offers it to the Congress for their kind acceptance.*)

BHARATA came next. He, too, was of venerable appearance and of stately carriage. His capacious mind looked out, as it were, from his quick, intelligent eyes. "I was the first," he said, "who reduced dramatic performances to a system. I am the author of a work on the Drama which has been named (Bharata Sanhita) after me. All the requirements of the stage have therein been mentioned:—the arrangement of sceneries and dresses, the selection of characters, the construction of the stage, the sentiments which should underlie each particular performance." (*Reads portions and offers the Work for acceptance by the Congress.*)

With lightsome steps and smiling lips RAMBHÁ then drew near. Who so divinely beautiful, so archly modest as the favorite dancer of Indra's Court! The jewelled *napuras* made a pleasant harmony as she moved her twinkling feet. Reverentially, yet archly bending her gazelle eyes on the assembly, she read out an epitome of her work on the soul-enthralling art of dancing, an accomplishment so well-befitting her sex. She propounded wonderfully definite rules regarding Expression, Glances from black-beaded eyes and other equally necessary auxiliaries of the Art. With inimitable grace she offered her Work to the august assembly, and, with the hope, timidly expressed, that it might be indulgently read,—stepped softly back.

Composedly and with measured steps, HUHU, the king of the *Gandharvas* (celestial musicians), came forward. "The life, the soul of music is '*Time*,'" said he. "Without '*Time*,' music would be as insipid as cooked food without salt. Hence was my life devoted to make this portion of the science of music perfect. The thoughts which the gods favored me with on this subject are enshrined in this my work on Musical *Time*, (*reads the substance*), and I offer it respectfully to this grand assembly."

Last came TUMBURU, the clear-eyed, whose serious air and thoughtful brow gave tokens sure of high inventive genius. "I too am closely allied to music," said he, with simple grace. "In my beautiful country my name will live for ever, for the creation of my brain, the indispensable *tumburá*, will always be the melodious consort of the vocal music of my native land. All musical instruments are the work of my hands. Here, in this work, have

I left a lasting record of my labors (*reads portions*), and I confidently offer it to this learned body."

A hush succeeded the address of the last of that celestial band. Never had the spirit of the East been in such close and friendly intercourse with the spirit of the West. Never before had such real gems from the famous mines of Indian Music, such curious details of its different branches been offered so freely and confidingly to the great minds of the West. The silence which hat fallen on the mighty assembly was suddenly broken, as a farewell chorus burst forth from those celestial representatives of ancient Hindusthan. They sung with feeling and truth of the glories of Germany, that alien land, which was the first to acknowledge the existence and appreciate the richness of the inexhaustible mind-treasures of the East:—

I.

O Germania,—mother of broad-browed thinkers,—what an array of gems is in thy Imperial museum,—new discoveries,—those gems of wonderful price,—fished out from the unfathomable depths of knowledge. Like brilliant stars shine they in thy crown of glory. Who can fathom the depth of thy wisdom? Not we, nor the heaven-taught sages of renowned *Aryavarta*.

II.

Crowned heads bow down before thee and obey thy behests. Yet hast thou not been forgetful, for thy virtues outshine the luminous planets in their brilliancy. Presided over by the genius of thy wise men, whose wisdom is like the wisdom of the gods, this glorious assembly excites the admiration of the world. Of earthly crowns thine is the most effulgent. Who can count its myriad rays or sum up the virtues which adorn thy delicate limbs, O Queen of Empires!

III.

Prosperity is thy portion; even KUVERA hast thou excelled. Kindlier than the Tree of Plenty is thy all-enduring Charity. The steadfastness of thy Patience tires out the mountain. Thy gentle heart is more ready to forgive than the Universal Heart of our mother-earth. The gravity of wisdom befits thy fair and thoughtful brow. Less brilliant is the summer sun than thy dazzling beauty; less serenely-tender is autumn's ivory moonlight than the smile on thy royal lips. The whiteness of thy fame, O Empress beloved, is not excelled even by the stainless white waves of the Ocean of Milk.

IV.

May the starry *Apsarás* sing of thy glory, and may their rolling chorus, mingling with the murmur of Mandákini—heavenly stream—make its ripples dance faster in their joyous course! May that flood of melody overflow the abodes of Brahma, drown the listeners, mortals and immortals, in ecstacy and fill them with wonder! May all blessings attend thee, O mighty Queen!

The five celestial representatives from the land of the rising sun vanished into thin air. But the lofty strains of their sublime chorus still vibrated within the spacious building, and their offerings—the written records of their genius—were there before the Great Congress, inviting exploration of those marvellous pages of Indian Wisdom.

संगीतोपहारः।

श्रीजयोऽभ्युदयोस्तु।

दीयतेऽयं कतिपयसङ्गीततत्त्वकुसुमकलितमाख्योपहारस्तत्रभवत्या भारतभूमिजनन्या सबहुमानमखिलधरामण्डललक्षलाभभूताये जार्म्मणिधरण्यै तदीयवर्षीनपरिषत्-समागतानां निखिलविदग्धविद्वज्जनानां विनोदनाय।

विद्वज्जनमहामेलां सम्भावयितुमाह्वयत्।
जार्म्मणिर्भारतधरां वर्षीने नगरोत्तमे॥

आह्वता भारतधरा सस्मार तनयान् प्रियान्।
गन्धर्ववेदनिष्णातान् देवमानवपूजितान्॥

ब्रह्मर्षिप्रान् महाभागान् दिव्यप्रज्ञानभूषितान्।
नारदं भरतं रम्भां ऊर्वशं तुम्बुरुमेव च॥

चिन्तितोपस्थितान् दिव्यप्रभाद्योतितदिङ्मुखान्।
इति भारतभूः पुत्रानुवाच मधुरं वचः॥

मच्छारुपङ्कजवनस्य दिने दिने यत्-
पुञ्जप्रभाकरकरः कुरुते विकासम्।
सा जार्ष्णिर्धरणिमौलिमणिः समानम्
मामाह्वयत् बुधसमाजसभाजनाय॥

वत्सैर्मम प्रतिनिधित्वमुपेत्य गत्वा
सङ्गीतपुष्परचितैरुपहारमाल्यैः।
सा कोविदाञ्चितसभा ननु माननीया
युष्मान् प्रसूय भुवनेऽस्मि हि रत्नगर्भा॥

अथादायोपहाराय स्वकृतीर्लोकविश्रुताः।
तां वर्द्धीनसभां जग्मुस्ते तड़ित्स्मरंहसः॥

अगणितबुधरत्नैर्द्योतमानं सदस्तत्
गगनमिव समन्तात् दीप्ततारासहस्रैः।
सविनयमभिवन्द्य स्वाकृतीर्दित्सवस्ते
बुधकुलमखिलं सम्बोधयामासुरेवम्॥

नारद उवाच।

रागशास्त्रं मया सृष्टं तदद्योपहराम्यहम्।
सारतोगदतस्तस्य तत्त्वं मे शृणुत साम्प्रतम्॥

रागप्रकरणम्।

पूर्णं चतुर्णां वेदानां सारमाकृष्य पद्मभूः।
दूरं तु पञ्चमं वेदं सङ्गीताख्यमकल्पयत्॥
त्रिवर्गफलदाः सर्वे दानयज्ञजपादयः।
एकं सङ्गीतविज्ञानं चतुर्वर्गफलप्रदम्॥
न नादेन विना गीतं न नादेन विना स्वरः।
न नादेन विना रागस्तस्मान्नादात्मकं जगत्॥
नकारः प्राणवायुः स्यात् दकारोऽग्निवाहनः।
ताभ्यामुत्पद्यते यस्मात्तस्मान्नादोऽयमुच्यते॥
स्वरूपमात्रश्रवणान्नादोऽनुरणनं विना।
श्रुतिरित्युच्यते भेदास्तस्य द्वाविंशतिर्मताः॥
श्रुतिभ्यस्तु स्वराः षड्जर्षभगान्धारमध्यमाः।
पञ्चमो धैवतश्चाथ निषादश्चेति सप्त ते॥
ऋग्वेदात् षड्जऋषभौ यजुषोमध्यधैवतौ।
सामवेदात् समुद्भूतौ तथा गान्धारपञ्चमौ।
अथर्वणो निषादश्च स्वरजन्म समीरितम्॥
षड्जं रौति मयूरो हि गावो नर्दन्ति चर्षभम्।
अजा विरौति गान्धारं क्रौञ्चो नदति मध्यमम्॥

पुष्पसाधारणे काले कोकिलो रौति पञ्चमम्।
अश्वश्च धैवतं रौति निषादं रौति कुञ्जरः॥
श्रुतिस्थाने स्वरान् वक्तुं नालं ब्रह्मापि तत्त्वतः।
जलेषु चरतां मार्गो मीनानां नोपलभ्यते॥
ग्रुद्वाः सप्त स्वराश्चे च मन्द्रादिस्थानतस्त्रिधा।
ग्रुद्वाः श्रुत्यादिभेदेन विकृता द्वादशाथमी॥
ते वादिसंवादिविवाद्यनुवादिभिदा पुनः।
स्वराश्चतुर्विधाः प्रोक्तास्तत्र वादी स कथ्यते।
बहुलो यः प्रयोगेषु वक्ति रागादिनिश्चयम्॥
समश्रुतिश्च संवादी पञ्चमस्य समः क्वचित्।
गनौ विवादिनौ स्यातां रिधयोर्वा तु तौ तयोः।
अनुवादी भवेच्छेषा इति पण्डितसम्मतम्॥
स्वराणां मूर्च्छनातानजातिजात्यंशकालनाम्।
व्यवस्थितश्रुतीनां हि समूहो ग्राम इष्यते॥
षड्जमध्यमगान्धारभेदात् स त्रिविधोमतः।
क्रमाद्ग्रामत्रये देवा ब्रह्म-विष्णु-महेश्वराः॥
हेमन्तग्रीष्मवर्षासु गातव्यास्तु यथाक्रमम्।
पूर्वाह्णकाले मध्याह्ने ऽपराह्णे ऽभ्युदयार्थिभिः॥
षड्जमध्यमनामानौ ग्रामौ गायन्ति मानवाः।
नतु गान्धारनामानं स लभ्यो देवयोनिभिः॥
आरोहणावरोहेण क्रमेण स्वरसप्तकम्।
मूर्च्छनाशब्दवाच्यं हि विज्ञेयं तद्विचक्षणैः॥

यदा तु मूर्च्छनाः शुद्धा भवेयुः षट्स्वरीकृताः।
पञ्चस्वरीकृता वापि शुद्धतानास्तदा मताः॥
अपूर्णाश्चैव पूर्णाश्च व्युत्क्रमोच्चारितस्वराः।
मूर्च्छनाः कूटताना स्युः कस्तान् संख्यातुमीश्वरः॥
गानक्रिया स्वराणां वै वर्ण इत्युच्यते स च।
स्थाय्यारोह्यवरोही च सञ्चारीति चतुर्विधः॥
रागोपवेशनं यत्र स स्थायी वर्ण उच्यते।
आरोही चावरोही च वर्णावन्वर्थनामकौ॥
यत्र ताने सञ्चरन्ति स्वरा अत्यन्तसंहिताः।
एकैकशो द्विशो वा स सञ्चारी वर्ण उच्यते॥
रागो ध्वनिविशेषस्तु स्वरवर्णविभूषितः।
यस्य श्रवणमात्रेण रज्यन्ते सकलाः प्रजाः॥
शिवशक्तिमयो रागः परमः प्रमसागरः।
यस्य स्मरणमात्रेण विष्णुरार्द्रतरोऽभवत्॥
मालवश्चैव मल्लारः श्रीरागश्च वसन्तकः।
हिन्दोलश्चाथ कर्णाटएते रागाः षड़ीरिताः॥
धानसी मालसी चैव रामकीरी च सिन्धुड़ा।
आशावरी भैरवी च मालवस्य प्रियाइमाः॥
वेलावली च पुरवी कानड़ा माधवी तथा।
कोड़ा केदारिका चापि मल्लारस्यप्रियाइमाः॥
गान्धारी शुभगा चैव गौरी कौमारिका तथा।
वेलोयारी च वैरागी श्रीरागस्य प्रियाइमाः॥

तुड़ी च पञ्चमी चैव ललिता पठमञ्जरी।
गुज्जरी च विभाषा च वसन्तस्य प्रियाइमाः॥
मायूरी दीपिका चैव देशकारी च पाहिड़ा।
वराड़ी मोरहाटी च हिल्लोलस्य प्रियाइमाः॥
नाटिका चाथ भूपाली रामकेली गड़ा तथा।
कामोदा चापि कल्याणी कर्णाटस्य प्रियाइमाः॥
पुरुषा वस्त्रभूषाढ्या रागास्ते मालवादयः।
प्रदोषे चापरास्ते च रजन्यां गानगोचराः॥
दशदण्डात्परं रात्रौ सर्व्वेषां गानमीरितम्।
मेघमल्लाररागस्य गानं वर्षासु सर्व्वदा॥
श्रीपञ्चमीं समारभ्य यावत्स्यात् शयनं हरेः।
तावद्वसन्तरागस्य गानमुक्तं मनीषिभिः॥
सर्व्वेषामिह रागाणां रागिणीनाञ्च सर्व्वशः।
रङ्गभूमौ नृपाज्ञायां कालदोषो न विद्यते॥
रागञ्चालापयेत् पूर्व्वं तत्पत्न्यस्तदनन्तरम्।
नाट्यपत्न्यः प्रगातव्या नृपाज्ञायां न दूषणम्॥
विभाषा ललिता चैव कामोदा पठमञ्जरी।
रामकीरी रामकेली वेलोयारी च गुज्जरी॥
देशकारी च शुभगा पञ्चमी च गड़ा तुड़ी।
भैरवी चाथ कौमारी रागिण्यो दश पञ्च च॥
एताः पूर्व्वाह्णकाले तु गीयन्ते गायनोत्तमैः।
वराड़ी मायूरी कोड़ा वैरागी चाथ धानुषी॥

वेलावली मोरहाटी सप्तैता रागयोषितः।
गेया मध्याह्नकाले तु यथा भरतभाषितम्॥
गान्धारी दीपिका चैव कल्याणी पुरवी तथा।
आशावरी कानड़ा च गौरीकेदारपाहिड़ाः॥
मायूरी मालसी नाटी भूपाली सिन्धुड़ा तथा।
सायाह्ने ताश्च रागिण्यः प्रगातव्याश्चतुर्दश॥
शक्रोत्थानं समारभ्य यावद्गर्भमहोत्सवम्।
गीयते तद्बुधैर्नित्यं मालसी सा मनोहरा॥
रागाः षड़थ रागिण्यः षट्त्रिंशच्चारुविग्रहाः।
आगता ब्रह्मसदनाद् ब्रह्माणं समुपासते॥

तमिमं गृह्णन्तु करुणया तत्रभवन्तः पारिषदाः जगत्त्रितयहृदयरञ्जनं रागरागिणीगणविरचितं मदीयमुपहारम्।

भरत उवाच।

नवकाव्यजगत्सृष्टिर्नाट्यशास्त्रं कृतं मया।
दीयते तत्सभे तुभ्यं तत्त्वं तस्य च कथ्यते॥

नाट्यप्रकरणम्।

योऽयं स्वभावो लोकस्य नानावस्थान्तरात्मकः।
साङ्गाभिनयसंयुक्तो नाट्यमित्युच्यते बुधैः॥
नाटकं सप्रकरणमङ्को व्यायोग एव च।
भाणः समवकारश्च वीथी प्रहसनं डिमः।
ईहामृगश्च विज्ञेयो दशमे नाट्यलक्षणे॥
सर्व्वेषामेव काव्यानां नाटका वृत्तयः स्मृताः।
आभ्यो विनिःसृतं ह्येतद् दशरूपं प्रयोगतः॥

जाताभः श्रुतिभिश्चैव स्वरा ग्रामत्वमागताः।
यथा तथा वृत्तिभेदैः काव्यभेदा भवन्ति हि॥
ग्रामौ पूर्णस्वरौ द्वौ तु यथा वै षड्जमध्यमौ।
सर्ववृत्तिविनिष्पन्नौ काव्यबन्धौ तथा त्रिमौ॥
ज्ञेयं प्रकरणं चैव तथा नाटकमेव च।
सर्ववृत्तिविनिष्पन्नं नानावस्थान्तरात्मयम्॥
भाणः समवकारश्च तथेहामृगएव च।
उत्सृष्टकाङ्को व्यायोगो वीथी प्रहसनं डिमः।
कौशिकीवृत्तिहीनानि रूपाण्येतानि कारयेत्॥
नृपतीनां यच्चरितं नानारसभावसंश्रितं बहुधा।
सुखदुःखोत्पत्तिकृतं भवति हि तन्नाटकं नाम॥
यत्र कविरात्मबुद्ध्या वस्तु शरीरं नायकं चैव।
औत्पत्तिकं प्रकुरुते तज्ज्ञेयं प्रकरणं नाम॥
प्रकरणनाटकविषये पञ्चाद्या दशपरास्तथा चैव।
अङ्काः कर्त्तव्याः स्युर्नानारसभावसंयुक्ताः॥
अङ्क इति रूढ़िशब्दो भावैश्च रसैश्च रोहयत्यर्थान्।
नानाविधानयुक्तो यस्मात्तस्माद्भवेदङ्कः॥
यत्रार्थस्य समाप्तिर्यत्र च बीजस्य भवति संहारः।
किञ्चिदवलग्नबिन्दुः सोऽङ्क इति सदावगन्तव्यः॥
ये नायका निगदितास्तेषां प्रत्यङ्गचरितसंयोगः।
नानावस्थान्तरितः कार्यस्त्वङ्को यथार्थरसः॥
यत्रार्थस्य समाप्तिर्न भवत्यङ्के प्रयोगबाहुल्यात्।
विष्कम्भः स्वल्पकथः प्रवेशकैः सोऽभिधातव्यः॥

शुद्धः सङ्कीर्णो वा द्विविधो विष्कम्भकोऽपि विज्ञेयः।
मध्यमपात्रः शुद्धः सङ्कीर्णो नीचमध्यक्षतः॥
न महाजनपरिवारं कर्त्तव्यं नाटकं प्रकरणं वा।
यत्तत्र कार्य्यं पुरुषाश्चत्वारः पञ्च वा ते स्युः॥
गोपुच्छाग्रं काव्यं कर्त्तव्यं बन्धमासाद्य।
ये चोदात्ता भावास्ते सर्वे दृष्टतः कार्य्याः॥
वृत्तिवृत्तं हि नाट्यस्य शरीरं परिकीर्त्तितम्।
पञ्चभिः सन्धिभिस्तस्य विभागः सम्प्रलक्षितः॥
वृत्तिवृत्तं द्विधा चैव बुधस्तु परिकल्पयेत्।
आधिकारिकमेकं स्यात् प्रासङ्गिकमथापरम्॥
यत्कार्य्यं हि फलप्राप्त्या समर्थं परिकल्प्यते।
तदाधिकारिकं ज्ञेयमन्यत् प्रासङ्गिकं विदुः॥
मुखं प्रतिमुखं चैव गर्भो विमर्षएव च।
तथा निवर्हणं चैव नाटके पञ्च सन्धयः॥
यत्र बीजसमुत्पत्तिर्नानार्थरससम्भवा।
काव्ये शरीरानुगता तन्मुखं परिकीर्त्तितम्॥
बीजस्योद्घाटनं यत्तु दृष्टं नष्टमिव क्वचित्।
मुखन्यस्तस्य सर्वस्य तद्वै प्रतिमुखं स्मृतम्॥
उद्भेदस्तस्य बीजस्य प्राप्तिरप्राप्तिरेव च।
पुनश्चान्वेषणं यत्र स गर्भ इति संज्ञितः॥
गर्भान्निर्भिन्नबीजार्थो विकल्पनकृतोऽपि वा।
क्रोधव्यसनजो वापि स विमर्षइति स्मृतः॥

समानयनमर्थानां व्याख्यानां तु सबीजिनाम् ।
नानाभावोत्तराणाञ्च भवेन्निवर्हणञ्च तत् ॥
धीरोद्धतो धीरललितो धीरोदात्तस्तथैव च ।
धीरप्रशान्तश्चैवेति नायका नाटकाश्रिताः ॥
देवा धीरोद्धता ज्ञेयाः सुधीरललिता नृपाः ।
सेनापतिरमात्याश्च धीरोदात्ताः प्रकीर्त्तिताः ॥
ब्राह्मणा वणिजश्चैव प्रोक्ता धीरप्रशान्तकाः ।
एते तु नायका ज्ञेयाः काव्यबन्धेषु सर्व्वदा ॥
दिव्या च नृपपत्नी च कुलस्त्री गणिका तथा ।
एतास्तु नायिका ज्ञेया नानाप्रकृतिलक्षणाः ॥
शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्सोऽद्भुत इत्येते नाट्येऽष्टौ कथिता रसाः ॥
कौशिक्यारभटी चैव सात्त्वती भारती तथा ।
चतस्रोवृत्तयोज्ञेयास्तासु नाट्यं प्रतिष्ठितम् ॥
हास्यशृङ्गारकरुणैर्वृत्तिः स्यात् कौशिकी रसैः ।
सात्त्वती चापि विज्ञेया वीररौद्राद्भुताश्रया ॥
भयानके सबीभत्से रौद्रे चारभटी भवेत् ।
भारती चापि विज्ञेया वीररौद्राद्भुताश्रया ॥
महारसं महाभोगसुदात्तवचनान्वितम् ।
महापुरुषसञ्चारं साध्वाचारं जनप्रियम् ॥
सुश्लिष्टसन्धिसंयोगं सुप्रयोगं सुखाश्रयम् ।
मृदुशब्दाभिधानञ्च कविः कुर्य्यात्तु नाटकम् ॥

अवस्था या हि लोकस्य सुखदुःखसमुद्भवा ।
नानापुरुषसञ्चारा नाटके सा भवेदिह ॥
न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।
न तत्कर्म्म समायोगो नाटके यत् न दृश्यते ॥
देवतानाञ्चर्षीणाञ्च राज्ञां लोकस्य चैव हि ।
पूर्व्ववृत्तानुचरितं नाटकं नाम तद्भवेत् ॥
सर्व्वभावैः सर्व्वरसैः सर्व्वकर्म्मप्रवृत्तिभिः ।
नानावस्थान्तरोपेतं नाटकं संविधीयते ॥
लोकस्य भावं सम्प्रेक्ष्य नराणाञ्च बलाबलम् ।
सम्भोगं चैव युक्तिञ्च ततः कार्य्यं तु नाटकम् ॥

तदिदं परमानन्दसन्दोहमादधत् सहृदयहृदयेषु नाट्यसूत्रविरचितमुपायनं मे पीयूषरसनिर्विशेषं स्वादयन्तु सामाजिकाः।

रम्भोवाच ।

ललितं ललनायोग्यं लास्यशास्त्रं श्रुतं मया ।
ददामि सादरं तुभ्यं तत्तत्त्वं च सभे शृणु ॥

नृत्यप्रकरणम् ।

नर्त्तनं विविधं नाट्यं वृत्तं नृत्यमिति क्रमात् ।
योऽयं स्वभावो लोकस्य नानावस्थान्तरात्मकः ।
साङ्गाभिनयनैर्युक्तो नाट्यमित्यभिधीयते ॥

दशविद्याप्रतीतोयस्तालमानलयाश्रितः।
सविलासोऽङ्गविक्षेपो वृत्तमित्युच्यते बुधैः॥
गात्रविक्षेपमात्रं तु सर्व्वाभिनयवर्ज्जितम्।
आङ्गिकोक्तप्रकारेण वृत्यं वृत्यविदो विदुः॥
ताण्डवं च तथा लास्यं द्विविधं वृत्यमुच्यते।
ताण्डवं पुंप्रधानं स्यात् लास्यं तु स्त्रीप्रधानकम्॥
यत्पूर्व्वं तण्डुना प्रोक्तं ताण्डवं हरदैवतम्।
तथा गौरीदैवतञ्च लास्यमुक्तं मनीषिभिः॥
द्रवीबभूव येनासौ विष्णुर्विश्वेश्वरो विभुः।
तेनैव गङ्गा सम्भूता जगत्त्रितयतारिणी॥
वीरे रसे महोत्साहे पुरुषो यच्च वृत्यति।
रौद्रभावरसोत्पत्तिर्यतस्तत् ताण्डवं स्मृतम्॥
सयौवनविलासिन्यः कामभावविचक्षणाः।
यदङ्गहारवैदग्ध्यात् कुर्य्युर्लास्यमुदीरितम्॥
लास्यं तु सुकुमारीणां मकरध्वजवर्द्धनम्।
छुरितं यौवतं चेति लास्यं द्विविधमुच्यते॥
यत्राङ्गाभिनयैर्भावैः रसैराश्लेषचुम्बनैः।
नायिकानायकौ रङ्गे वृत्यतश्छुरितं हि तत्॥
मधुरं बल्लवीलाभिर्नटीभिर्यच्च वृत्यते।
वशीकरणविद्याभं तल्लास्यं यौवनं मतम्॥
यत्तवं स्थिरता रेखा भ्रमरी दृष्टिरभ्रमा।
प्रीतिर्मेधा वचोगीतिर्वृत्यप्राणा दश स्मृताः॥

शिरो वक्षस्तथा हस्तौ पार्श्वे कटितटं तथा।
पादाविति षडङ्गानि प्रोक्तान्यत्र मनीषिभिः॥
प्रत्यङ्गानि पुनर्ग्रीवा बाहुपृष्ठं तथोदरम्।
जघनञ्च षडित्यच कथयन्ति विपश्चितः॥
उपाङ्गानि भ्रुवौ नेत्रे नासागण्डस्थलाधरम्।
चिबुकञ्चेति षट् प्राहुर्वृत्ये वृत्यविशारदाः॥
षट्त्रिंशत् हृष्टयो वृत्ये तचाष्टौ रसहृष्टयः।
स्थायिभावकृताश्चाष्टौ शेषाः सञ्चारिभावजाः॥
यतो हस्तं ततो दृष्टिर्यतो दृष्टिस्ततो मनः।
यतो मनस्ततो भावो यतो भावस्ततो रसः॥
अङ्गेनालम्बयेद्गीतं हस्तेनार्थं प्रदर्शयेत्।
चक्षुर्भ्यां भावमित्याहुः पादाभ्यां तालनिर्णयः॥
भानवी मैनवी चैव गजलीला तुरङ्गिणी।
हंसी हगी खञ्जरीटी गतयः सप्तधा मताः॥
भानोर्गतिरिवाऽलक्ष्या या स्यात् पात्रस्य वृत्यतः।
सा भानवी गतिः सद्भिर्भाषिता जनरञ्जिनी॥
कूपान्तर्गतमीनस्य विश्रान्तिरहिता गतिः।
यथा तथैव नटति या स्यात् सा मैनवी मता॥
गतिर्मन्दा विलासेन मत्तकुञ्जरवद्भवेत्।
नटस्य यच्च वृत्ये तु सा गतिर्गजगामिनी॥
अश्रमा या गतिः शीघ्रा वाचो व्यावर्त्तनोत्तरा।
असौ तुरङ्गिणी सद्भिर्गदिता गतिवेदिभिः॥

हंसस्येव गतिर्मन्दा मन्दव्यावर्त्तनोत्तरा।
या विशाला हंसिनी सा नर्त्तने कथिता बुधैः।
मृगीव चकिताक्षी याऽनुरक्ता नर्त्तकी यदा।
गतिं तु रचयेन्नृत्ये सा मृगी परिकीर्त्तिता॥
समं पादं समारभ्य गीयते द्रुतमानतः।
खञ्जरीटखगस्येव खञ्जरीटी भवेदसौ॥
नृत्यादौ प्रथमं नृत्यं मुखचालिरिति स्मृता।
नान्दीपुष्पाञ्जलिक्षेपादिकं तत्र प्रयुज्यते॥
मार्गतालैः क्रमेणैव आदितालेन नर्त्तनम्।
ग्रन्थचालिसदा प्रोक्ता लक्ष्मद्वधा विचक्षणैः॥
अङ्गैर्हुंतादिमानः स्यात् तत्तत्कारच्च पादयोः।
वाद्याक्षरं रसैर्युक्तं ग्रन्थनृत्यं तदा भवेत्॥
स्थाय्यादिवर्णनोपेतं तालमानलयान्वितम्।
गीतनृत्यमिति प्रोक्तं गीतलीलानुसारि यत्॥
भावभावादिसुलभं लास्यलीलामनोहरम्।
स्वरमञ्चकनृत्यं तदुक्तं नृत्यविशारदैः॥
यस्य गीतस्य यो रागस्तत्र मुख्यास्त्रयः स्वराः।
ग्रहांशन्यासभेदात्तेऽभिनेयाः स्वरमञ्चके॥
एवं षड्विधं नृत्यं तद्भेदाश्चाप्यनेकशः।
लक्षणानि च तत्सर्व्वं गौरवाच्चात्र कीर्त्तितम्॥

तमिमं ललिताङ्गहारापहृतसकललोकचित्तवृत्तिं गृह्णन्तु करुणया नृत्यतत्त्वोपहारमबलाजनस्य पूजनीयाः सहृदयकुलधुरीणाः।

ऊर्ध्वरुवाच।

तालशास्त्रं मया यत्नान्निबद्धं प्रददामि ते।
समाकर्णय तत्तत्त्वं विद्वज्जनसभे शुभे॥

तालप्रकरणम्।

तकारे शङ्करः प्रोक्तो लकारे पार्व्वती स्मृता।
शिवशक्तिसमायोगात्ताल इत्यभिधीयते॥
शिवशक्त्यात्मकं पुंस्त्रं यशस्त्रं भुक्तिमुक्तिदम्।
दशप्राणात्मकं तालं यो जानाति स तत्त्ववित्॥
क्षणादिरूपो यः कालः स प्राणत्वेन कीर्त्यते।
गीतादेस्तु मितिं कुर्व्वन् स एवायाति तालताम्॥
कालो मार्गः क्रियाङ्गानि ग्रहो जातिः कला लयः।
यतिः प्रस्तारकश्चेति ताले प्राणा दश स्मृताः॥
अनुद्रुतो ध्रुवश्चैव लघुर्गुरुतः परम्।
प्लुतश्चैवं क्रमेणैते तालाङ्गानि च षड्विधा॥
ग्रहणं द्विविधं प्रोक्तं समञ्च विषमं तथा।
विषमं तु तथाऽतीतमनागत इति द्विधा॥
षड्लघुश्चरोच्चारकालो मात्रा समीरिता।
तदर्द्धं द्रुतमित्युक्तं तदर्द्धञ्चाप्यनुद्रुतम्॥

स्याद्वृत्तिः पदभागादेः परिवर्त्तनमिष्यते ॥
विश्रान्तियुक्तया काले क्रियया मानमिष्यते ।
क्रियानन्तरविश्रान्तिर्लयः स त्रिविधो मतः ॥
द्रुतो मध्यो विलम्बश्च द्रुतः शीघ्रतमो मतः ।
द्विगुणाद्विगुणौ ज्ञेयौ तस्मान्मध्यविलम्बितौ ॥
लयप्रवृत्तिनियमो यतिरित्यभिधीयते ।
समा स्रोतोगता चान्या गोपुच्छा त्रिविधेति सा ॥
चञ्चत्पुटश्चाचपुटः षट्पितापुत्रकस्तथा ।
सम्पर्केष्टाक उद्घट्टः पञ्च तालेश्वरा द्रुमे ॥
ताले चञ्चत्पुटे ज्ञेयं गुरुद्वन्द्वं लघुः प्लुतश्च ।
सद्योवक्त्रोद्भवः शुक्लश्चञ्चत्पुटोऽष्टमात्रकः ॥
ताले चाचपुटे ज्ञेयो भगणो गुरुरेव च ।
वामदेवमुखाज्जातः षण्मात्रः पीतवर्णकः ॥
षट्पितापुत्रके त्र्यस्रभेदे पोगोगुरुर्गलौ ।
ईशानजो रक्तवर्णो ज्ञेयं द्वादशमात्रकः ॥
सम्पर्केष्टाकके भेदाः षट्पितापुत्रकस्य च ।
तद्वद् यथाक्षरः कार्य्याः प्लुताद्यन्ताक्षरस्तथा ।
अघोराख्यमुखाज्जातो नीलवर्णोऽयमीरितः ॥
गुरुत्रयसमायुक्त उद्घट्टः सम्प्रकीर्त्तितः ।
तत्पुरुषात् समुद्भूतो बब्रुवर्णोऽयमीरितः ॥
आदितालो दर्पणश्च श्रीरङ्गः सिंहविक्रमः ।
रङ्गतालो रङ्गलीलश्चञ्चरी वीरविक्रमः ॥

त्रिभिन्नोऽपि च कन्दर्पो हंसलीलः परिक्रमः ।
प्रत्यङ्गो मल्लिकामोदः सिंहविक्रीड़ितोऽपि च ॥
वर्णलीलो वर्णतालः प्रतितालो द्वितीयकः ।
हंसनादः सिंहनादो विजयः सिंहनन्दनः ॥
राजतालश्चित्रभङ्गिश्च वङ्काभरणएव च ।
मश्वस्तुरगलीलश्च जयश्रीर्जयमङ्गलः ॥
वङ्गोद्योतः कीर्त्तितालो राजविद्याधरस्तथा ।
राजचूड़ामणिः क्रीड़ा श्रीकान्तिः कोकिलप्रियः ॥
वनमाली विन्दुमाली मकरन्दश्च नन्दनः ।
मुकुन्दः कन्दुको नान्दी विषमो लघुदीपकौ ॥
प्रतापशेखरो लक्ष्मीर्जगझम्पश्चतुर्मुखः ।
कङ्कालो राजझङ्कारः षट्तालो लघुशेखरः ॥
प्रतिमश्चसृतीयश्च सारङ्गो नन्दिवर्द्धनः ।
मदनः पार्व्वतीनेत्रो ललितो ललितप्रियः ॥
वसन्तो जयतालः स्याद्भङ्गो वङ्गदीपकः ।
राजनारायणो मिश्रः शिवः शरभलीलकः ॥
कर्म्मोऽभिनन्दनश्च स्यादनङ्गो रागवर्द्धनः ।
लीलावलोकितो वर्णयतिर्निःसारदुर्ब्बलौ ॥
समतालोऽन्तरक्रीड़ा रूपकश्चैकतालिका ।
ब्रह्मतालो वर्णभीरुरेजतो घटकर्कटः ॥
रतिलीलः कङ्कणको राजकोलाहलस्तथा ।
मलयः कुण्डलाख्यः स्यात् खण्डो नागश्च भङ्गकः ॥

वर्द्धमानः सन्निपातो भोगश्च राजशीर्षकः।
उद्घट्टभाम्पत्तिपुटकन्दविद्याधिरा नृपः॥
चक्रक्रीडोऽपि जनक उत्सवो गजलीलकः।
चतुस्तालश्चन्द्रकला मल्लिका वर्णमल्लिका॥
टङ्को मोक्षपतिश्चैते देशीतालाः प्रकीर्त्तिताः।
अन्ये च सन्ति भूयांसो बाहुल्याच्च मयेरिताः॥
तौर्यत्रिकं तु ततवेद्यं तालं तस्याङ्कुशं विदुः।
न्यूनाधिकप्रमाणे तु प्रमाणं क्रियते यतः॥
वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः।
तालज्ञश्चाप्रयासेन मोक्षमार्गं स गच्छति॥

मदुपनीतमिदमुच्छ्वसितमिव सङ्गीतस्य गृह्यतां तालतत्त्वोपायनं भूवनभूषणैर्गोष्ठीजनैः।

तुम्बुरुरुवाच।

यन्त्रं निर्म्माणविज्ञानं दीयते सादरं मया।
अशेषशेमुषीसारं सारतस्तन्मयोच्यते॥

यन्त्रप्रकरणम्।

तालेन राजते गीतं तालो वादित्रसम्भवः।
गरीयस्त्वेन वादित्रं नृत्यगीतैकसाधनम्॥
तत् ततानद्धशुषिरघनानीति चतुर्व्विधम्।
ततं वीणादिकं वाद्यमानद्धं मुरजादिकम्॥

वंश्यादिकं तु शुषिरं कांस्यतालादिकं घनम्।
आलापिनी ब्रह्मवीणा किन्नरीति निगद्यते॥
विपञ्ची वल्लकी व्यष्टा चित्रा घोषवती जया।
हस्तिका कूर्म्मिका कुब्जा सारङ्गी परिवादिनी॥
त्रिसरी श्वेततन्त्री च नकुलोष्ठी च ठंसरी।
औडुम्बरी पिनाकी च निबद्धः पुष्कलस्तथा॥
गदावरश्चित्रकश्च रुद्रोऽथ स्वरमण्डलः।
कपिनासो मधुस्यन्दी घनेत्यादि ततं भवेत्॥

[इति ततभेदाः।

मर्दलः कम्बुजश्चैव ढक्का पटहको वरः।
पणवः कुण्डली भेरी पदवाद्यश्च शर्करः॥
डमरुष्टमकिर्मर्दलो डड्डुका मड्डिण्डिमौ।
उपाङ्गदर्य्यावित्यादि तद्ववदानद्धमीरितम्॥

[इति आनद्धभेदाः।

वंशोऽथ पारी मधुरी तित्तिरीयङ्गकाहलाः।
तोड़ही मुरली वृद्धा शृङ्गिकाखरनाभयः॥
श्रृङ्गं कापालिकं वंशचर्म्मा वंशस्तथाऽपरः।
एते शुषिरभेदास्तु कथिताः पूर्व्वसूरिभिः॥

[इति शुषिरभेदाः।

करतालः कांस्यघनो जयघण्टाऽथ क्षुत्रिकः।
कम्भिका पटवाद्यश्च घण्टा तोद्यश्च घर्घरश्च॥

क्षुद्रतालश्च मञ्जीरः कातर्यङ्कुर एव च।
द्वादशैते मुनीन्द्रेण कथिता घनसंज्ञकाः॥

[इति घनभेदाः।

कनिष्ठिकापरिध्यर्द्धमध्यच्छिद्रेण संयुतः।
दशमुष्टिमितो दण्डः खादिरो वैणवोऽथवा॥
अधः करभवानूर्द्धं छत्रावल्यभिशोभितः।
नवाङ्गुलादधश्छिद्रोपरि चन्द्रार्द्धसन्निभाम्॥
निवेश्य दृद्धिकां तत्राऽलाबुखण्डं निवेशयेत्
द्वादशाङ्गुलविस्तारं दृढपक्वं मनोहरम्॥
तुम्बिकावेधमध्येन दण्डच्छिद्रेण निर्म्मिताम्।
अलाबुमध्यगां भेरीं कृत्वा खल्वाच्च काष्ठिकाम्॥
तथा संवेद्य तन्मध्ये काष्ठिकां भ्रामयेत्तथा।
यथा स्याच्चिचलालाबुर्बन्धच्च करभोपरि॥
पश्चाङ्गुलानि संत्यज्याऽलाबुं खल्वाच्च बन्धयेत्।
कोशैश्च निर्म्मिता षट्मयी कृत्तकृताऽथवा॥
समा श्लक्ष्णा दृढा तत्र देया तन्त्री विचक्षणैः।
तारे मन्द्रे च मध्ये च विस्थाने बन्धयिष्यति॥

[इत्यादि आलापिनीलक्षणम्।

आनद्धे मर्दलः श्रेष्ठस्तस्यालक्षणं ब्रुवे।
मर्दलः खादिरः श्रेष्ठो हीनः स्यादन्यदारुजः॥
रक्तचन्दनजो रम्यो गम्भीरध्वनिरुच्चकैः।
सार्द्धहस्तप्रमाणं तु दैर्घ्यमस्य विधीयते॥

त्रयोदशाङ्गुलं वामभथवा द्वादशाङ्गुलम्।
दक्षिणञ्च भवेद्धीनमेकेनार्द्धाङ्गुलेन वा॥
करणानद्धवदनो मध्ये चैव पृथुर्भवेत्।
षण्मासीयो भवेद्वत्सस्तच्चर्म्म करणं मतम्॥
वृत्तिकानिर्म्मितश्चैष मृदङ्गः परिकीर्त्तितः।
पातयेत् खरलिं वाद्यवादनार्थञ्च मर्दले॥

[इति मर्दललक्षणम्।

वर्त्तुलः सरलश्चैव पर्व्वदोषविवर्जितः।
वैणवः खादिरो वापि रक्तचन्दनजोऽथवा॥
श्रीखण्डजोऽथ सौवर्णो दन्तिदन्तमयोऽथवा।
कनिष्ठाङ्गुलितुल्येन गर्भरन्ध्रेण शोभितः।
शिल्पविद्याप्रवीणेन वंशः कार्य्यो मनोहरः॥
तत्र त्यक्त्वा शिरोदेशादधो द्विमितमङ्गुलम्।
फुत्काररन्ध्रं कुर्व्वीत मितमङ्गुलिपर्व्वणा॥
पञ्चाङ्गुलानि संत्यज्य तारारन्ध्राणि कारयेत्।
कुर्य्यात् तथाऽन्यरन्ध्राणि समसंख्यानि कौशलात्॥
वदरीबीजतुल्यानि संत्यज्याऽधोर्द्ध मङ्गुलम्।
प्रान्तयोर्बन्धनं कार्य्यं स्वर्णाद्यैर्नादहेतवे।
सिक्थकेन कला देया तेन सुस्वरता भवेत्॥

[इत्यादि वंशलक्षणम्।

त्रयोदशाङ्गुलव्यासौ गुडकाष्ठविनिर्म्मितौ।
मध्यमुखौ घनाकारौ तन्मध्यौ रज्जुगुम्फितौ॥

एश्विनीपत्रसदृशौ कराभ्यां रज्जुयन्त्रितौ।
करतालावुभौ वाद्यौ पाटैर्झनटकैरिति॥
[इत्यादि करताललक्षणम्।

ततं वाद्यञ्च देवानां गन्धर्व्वाणाञ्च शौषिरम्।
आनद्धं राक्षसानाञ्च मानवानां घनं विदुः॥

तदिदं तौर्य्यत्रिकैकसाधनं यन्त्रविज्ञानरूपमुपायनं मे गृह्णन्त्वपया विदग्धगोष्ठीजनाः।

अथ जार्म्मणिस्तोत्रम्।

ते भारतधरासारैः सङ्गीताब्धिसमुद्भृतैः।
तां सभामर्च्चयामासुरेवं रत्नैरपार्थिवैः॥

अथ दिव्यप्रभावास्ते ब्रह्मलोकनिवासिनः।
सम्भूय सर्व्वे युगपत् स्तुतिगीतैः सुमङ्गलैः॥

* व्यक्तैः पूर्णैः प्रसन्नैश्च सुकुमारैरलङ्कृतैः।
समैः सुरक्तैः स्निग्धैश्च विश्लिष्टैर्मधुरैस्तथा॥

अगण्यपुण्यसन्तानोद्योतितां जार्म्मणिं धराम्।
अशेषजगदाश्चर्य्यप्रसूतिमुपतस्थिरे॥

---

* व्यक्तं पूर्णं प्रसन्नञ्च सुकुमारमलङ्कृतम्।
समं सुरक्तं स्निग्धञ्च विश्लिष्टं मधुरं तथा॥
दशैते स्युर्गुणा गीते तत्र व्यक्तं स्फुटैः स्वरैः।
प्रकृतिप्रत्ययैश्चोक्तं छन्दोरागपदस्वरैः॥
पूर्णं पूर्णाङ्गमकं प्रसन्नं प्रकटार्थकम्।
सुकुमारं कण्ठभवं विस्थानोच्चमलङ्कृतम्॥
समवर्णलयस्थानं सममित्यभिधीयते।
सुरक्तं वल्लकीवंशकण्ठध्वानैकतानुतम्॥
नीचोच्चद्रुतमध्यादौ स्निग्धत्वे स्निग्धमुच्यते।
उच्चैरुच्चारणादुक्तं विश्लिष्टं भरतादिभिः।
मधुरं धैर्य्यलावण्यपूर्णं जनमनोहरम्॥

ज्ञानाम्भोनिधिगर्भतोऽतिविषमाल्लोकोत्तरं यत्त्वया
सत्तत्त्वाद्भुतवैभवं प्रतिदिनं यत्नात् समुन्नीयते।
तन्नूनं मणिरत्नकोटिसुषमां न्यक्कृत्य विद्योतते
पारं ते महिमाम्बुधेर्नहि वयं जानीमहे जार्ष्णये॥

आज्ञा तेऽखिलराजराजिमुकुटालङ्कारसञ्चारिणी
पुण्यालिस्तव तारकाग्रहशतज्योतिस्तिरस्कारिणी।
त्वद्गोष्ठी जितजीवबुद्धिविभवैः सम्यैश्चमत्कारिणी
किं वाच्यं तव गौरवं वसुमतीचूडामणे जार्ष्णणे॥

ऋद्धिस्तेऽखिलराजराजविभवं दानञ्च कल्पद्रुमम्
धैर्य्यं भूमिधरं क्षमा च वसुधां गाम्भीर्यरत्नाकरम्।
तेजस्ते च निदाघभास्करकरं शान्तिः शरच्चन्द्रिकाम्
कीर्त्तिर्दुग्धसमुद्रमुग्धलहरीलीलाञ्च विष्पर्द्धते॥

उद्गीता सुरसुन्दरीभिरसकृत्कण्ठैः सुधावर्षिभिः
स्वर्गङ्गाद्युतिहारिलोललहरीनादेन सम्मूर्च्छिता।
सामन्दञ्च सविस्मयं सुरनरैस्त्वत्कीर्त्तिराकर्णिता
तस्मिन् धाम्नि परात्परस्य परमे ब्रह्मण्यतां ब्रह्मणः॥

---

(१)

No. 1.

रागिणी सारङ्गी।

RAGINI SARANGI.

(२)

No. 2.

रागिणी विभाषा।

RAGINÍ VIBHASHA.

आ ० ० ज्ञा ते खि ल रा ज ० रा ० जि ०
Á — — juá te khi la rá ja — rá — ji
मु ० कु ० टा ल ० म् का र सं चा रि ०
mu — ku — tá la — m ká ra sañ chá ri —
णी पु ण्या लिष्ट त व ता र का ग्र ह श्र त
ní Pu nyá lis ta va tá ra ká gra ha s'a ta
ज्यो ० तिष् ति रस् का रि णी। त्व द् गो ष ठी जि
jyo — tis ti ras ká ri ní Tva d go sh thí ji
त ० जी ० व बु द् धि ० वि भ ० वैः ० स ०
ta — jí — va bu- d dhi — vi bha — vaih — sa —
भ्यै श् च ० म त् का रि णी किं वा च्यं त व गौ
bhyai s' cha — ma- t ká i ní. Kiñ vá chyañ ta va gau
र वं व सु म ती चू ड़ा म णे जा र् म णे॥
ra vañ va su ma tí chú da ma ne já r ma ne.

(३)

No. 3.

रागिणी केदारी।

RÁGINÍ KEDÁRI.

श्रद धिस ते खि ल ० रा ज ० रा ज वि भ वं दा
Rid dhis te khi la — rá ja — rá ja vi bha bañ dá
नं च कल् प ० ० द्रु मं धै ० र् यं भू मि ध रं
ñ cha kal pa — — dru mañ Dhai — r yañ bhú mi dha rañ
क्ष मा च व सु धां गम् भीर् य म ० म् भो ० ० नि धिम्।
ksha má cha va su dháñ gám bhír ya ma — m bho — — ni dhim.
ते ० ० जस् ते च नि दा घ भास् क र क ० ०
Te — — jas te cha ni dá gha bhás ka ra ka — —
रं श्रान् तिः श् र च् च ० न् द्रि कां कीर् ति र् दु ग्
rañ S'áu tih sa rack cha — n dri káñ. Kír thi r du g
ध ० सं मु द्र ० मग् ध ० ० ० ल ह ० री ०
dha — sa mu dra — mug dna — — — la ha — rí —
ली लां ० च विष् प ० र् ध ते॥
lí láñ — cha vish pa — r dha te.

(8)

No. 4.

रागणी खाम्बावती।

RACINI KHAMBAVATI.

उद् गी ता ० ० सु र सुन् द री भि र स कृत्
Ud gí tá — — su ra sun da rí bhi ra sa krit
कण् ठैः सु धा वर् षि ० भिः स्वर् गङ् गा स्रु ति ० ०
kaṇ thaih su dhá var shi — bhih Svar gaṅ gá s'ru ti — —
हा रि लो ० ० ल ० ० ल ० ह री ना ० दे ०
há ri lo — — la — — la — ha rí ná — de —
न सम् मूर् छि ता। सा नन् दं च स विस् म यं
na sam múr chhi tá. Sá nan daṅ cha sa vis ma yaṅ
सु र न रैस् त्वत् कीर् ति रा क ० र् णि ता त स
su ra na rais tvat kír ti rá ka — r ṇi tá Tas
नि न धाम् नि प रात प र स्य ० ० प र मे बं भ्र
min dhám ni pa rat pa ra sya — — pa ra ma baṅ bhra
म्य तां ब्र ह्म णः॥
mya taṅ bra hma nah.